# Vishnuproktam Shivaradhanopadesham

# વિષ્ણુપ્રોક્તં શિવારાધનોપદેશમ્

## Document Information

Text title : Vishnuproktam Shivaradhanopadesham

File name : shivArAdhanopadeshamviShNuproktaM.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 16 | 6-20.1||

Latest update : April 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 28, 2024

*sanskritdocuments.org*

# વિષ્ણુપ્રોક્તં શિવારાધનોપદેશમ્

શિવારાધનસંસક્તો દાવાનલગતોઽપિ સન્ ।
દુઃખં સર્વાત્મના બ્રહ્મન્ન પ્રાપ્નોતિ ન સંશયઃ ॥ ૬॥

અસ્માભિઃ શિવપૂજાયાં યત્નઃ કાર્યોઽતિભક્તિતઃ ।
શઙ્કરાભ્યર્ચનાદેવ સર્વાઃ સિધ્યન્તિ સિદ્ધયઃ ॥ ૭॥

તથાચ શઙ્કરસ્યૈવ પૂજાં કુર્મો નિરન્તરમ્ ।
સ્મર્તવ્યઃ શઙ્કરો નિત્યં શં કરોતીતિ શઙ્કરઃ ॥ ૮॥

શં નામાનલ્પમવ્યક્તં સુખં નિર્વચનાતિગમ્ ।
સતતં યસ્ય જિહાને શઙ્કરેત્યસ્તિ નામ સઃ ॥ ૯॥

દુઃખભાઙ્ન ભવત્યેવ સત્યં સત્યં ન સંશયઃ ।
ત્રિપુણ્ડ્રધારણં કૃત્વા મહાદેવમનુસ્મરન્ ॥ ૧૦॥

યો યાતિ યત્ર તત્રૈવ મહાદેવોઽધિતિષ્ઠતિ ।
મહાદેવ મહાદેવ મહાદેવેતિ વાદિનમ્ ॥ ૧૧॥

વત્સં ગૌરિવ ગૌરીશો ધાવન્તમનુધાવતિ ।
મહાદેવ મહાદેવ મહાદેવેત્યયં ધ્વનિઃ ॥ ૧૨॥

સુધિયો મુક્તિકાન્તાયાઃ પાણિગ્રહણડિણ્ડિમઃ ।
મહાદેવ મહાદેવ મહાદેવેત્યયં ધ્વનિઃ ॥ ૧૩॥

અપમૃત્યુહરો તૂનં કાલમૃત્યુહરોઽપિ સઃ ।
મહાદેવ મહાદેવ મહાદેવેત્યયં ધ્વનિઃ ॥ ૧૪॥

જન્મમૃત્યુજરાવ્યાધિભયનિર્હરણક્ષમઃ ।
મહાદેવ મહાદેવ મહાદેવેત્યયં ધ્વનિઃ ॥ ૧૫॥

સંસારસર્પદષ્ટાતાં દિવ્યૌષધિરસોઽવ્યયઃ ।
મહાદેવેતિ વાગ્વલ્લી ચતુરક્ષરપલ્લવા ॥ ૧૬॥

ભક્તિસિક્તા ભવત્યેકા ચતુર્વર્ગફલપ્રદા ।
મહાદેવેતિ વિમલો નામકલ્પતરુર્વિધે ॥ ૧૭॥

યો યં કામયતે કામં તં તં પૂરયતિ ક્ષણાત્ ।
કોટયો બ્રહ્મહત્યાનામગમ્યાગમકોટયઃ ॥ ૧૮॥

સદ્યઃ પ્રલયમાયાન્તિ મહાદેવેતિ કીર્તનાત્ ।
મહાદેવેતિ નામેદં યઃ શ઼ૃણોતિ વદિષ્યતિ ॥ ૧૯॥

ન તસ્ય નરકાવાસઃ સત્યં સત્યં ન સંશયઃ ॥ ૨૦.૧॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે વિષ્ણુપ્રોક્તં મહાદેવારાધનોપદેશં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૧૬ । ૬-૨૦।૧॥

- .. shrIshivarahasyam ugrAkhyaH saptamAMshaH . adhyAyaH 16 . 6-20.1 ..

Notes:
Viṣṇu વિષ્ણુ delivers the Upadeśa ઉપદેશ to Deva-s દેવાઃ telling them that He Himself worships Śiva શિવ. Viṣṇu વિષ્ણુ explains to them the meaning and derivation of the name Śaṅkara શઙ્કર and tells them about the merits of His Caturākṣara ચતુરાક્ષર name  Mahhādeva મહાદેવ.

Encoded and proofread by Ruma Dewan

*Vishnuproktam Shivaradhanopadesham*
pdf was typeset on April 28, 2024

Please send corrections to *sanskrit@cheerful.com*